उपायः प्रतिविधिर्ज्ञानं दशबुद्धवलानि च ॥"
इति वचनात् दश बलान्यस्य ।) बुद्धः । इत्यमरः । १ । १ । १४ ॥

दशभुजा, स्त्री, ( दश भुजा बाहवो यस्याः ।) दुर्गा । यथा, कालिकापुराणे ५६ अध्याये ।
"इतिवृत्तं पुराकल्पे मनोः स्वायम्भुवेऽन्तरे ।
प्रादुर्भूता दशभुजा देवी देवहिताय वै ॥
दृष्टा त्रेतायुगस्यादौ जगतां हितकाम्यया ।
पुराकल्पे यथा वृत्तं प्रतिकल्पं तथा तथा ॥
प्रवर्त्तते स्वयं देवी दैत्यानां नाशनाय वै ।
प्रतिकल्पं भवेद्रामो रावणश्चापि राक्षसः ॥
तथैव जायते युद्धं तथा त्रिदशसङ्गमः ।
एवं रामसहस्राणि रावणानां सहस्रशः ॥
भवितव्यानि भूतानि तथा देवी प्रवर्त्तते ।
पूजयन्ति सुराः सर्व्वे वलं भीराजयन्त्यपि ॥
तथैव च नराः सर्व्वे कुर्य्युः पूजां यथाविधि ॥"
( दशबाहुविशिष्टे, त्रि । यथा, कात्यायनीतन्त्रे महाकाल्या ध्यानम् ।
"दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशालया राजमाना त्रिंशल्लोचनमालया ॥")

दशभूमिगः, पुं, ( दशसु भूमीषु दानादिवत्तेषु गच्छतीति । गम + डः । ) बुद्धः । इति हेमचन्द्रः । २ । १४७ ॥

दशभूमीशः, पुं, ( दशसु भूमीषु दानादिषु ईष्टे प्रभवतीति । ईश् + अच् ।) बुद्धः । इति त्रिकाण्डशेषः ॥

दशमः, त्रि, ( दशानां पूरणः । दशन् + "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । "नान्तादसंख्यादेर्मट् ।" ५ । २ । ४९ । इति मट् ।) दशसंख्यायाः पूरणः । इति व्याकरणम् ॥ दशइ इत्यादि भाषा । ( यथा, ऋग्वेदे । १ । १५८ । ६ ।
"दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे ॥")

दशमी, स्त्री, ( दशम + ङीप् । ) तिथिविशेषः । सा चन्द्रस्य दशमकलाक्रियारूपा तदुपलक्षितकालपरा वा । इति तिथ्यादितत्त्वम् ॥ सा सर्व्वासां दिशामतिप्रिया । यथा,—
"दशमी च तिथिस्तासामतीव दयिताभवत् ।
तस्यां दध्याशनो यस्तु सुव्रती भवते नरः ॥
तस्य पापक्षयं तास्तु कुर्व्वन्त्यहरहर्नृप ! ॥"
इति वराहपुराणम् ॥ * ॥
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"विद्याविनोदी धनपुत्त्रयुक्तः
प्रलम्बकण्ठो मदनाधिकश्रीः ।
उदारचित्तः सुमना दयालुः
प्रसूतिकाले दशमी यदि स्यात् ॥"
विसुक्तावस्था । मरणावस्था । अतिशेषवयोऽवस्था । इति नानार्थटीकायां भरतः ॥ (दशसंख्यायाः पूरणी । यथा, मनुः । २ । ९० ।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥")

दशमी, [न्] त्रि, ( दशम + "वयसि पूरणात् ।" ५ । २ । १३० । इति इनिः । ) अतिवृद्धः । नवतेरूर्द्ध्वं दशमीऽवस्थाविशेषः स विद्यतेऽस्येति । इत्यमरभरतौ ॥

दशमीस्थः, त्रि, (दशम्यामवस्थायां तिष्ठतीति । स्था + कः । ) क्षीणरागः । स नष्टवीजः मरणावस्थाप्राप्तश्च । वृद्धः । स च अतिवृद्धो नवतेरुपरि वर्त्तमानः । इत्यमरभरतौ ॥ स्रताशनम् । इति हेमचन्द्रः ॥

दशमुखः, पुं, ( दश मुखानि यस्य । ) रावणः । इति त्रिकाण्डशेषः ॥ ( यथा, गीतगोविन्दे । १ । ११ ।
"वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिवलिं रमणीयम् ॥")

दशमुखान्तकः, पुं, (दशमुखस्य रावणस्य अन्तकः ।) श्रीरामः । इति शब्दरत्नावली ॥

दशमूत्रकं, क्ली, (दशानां मूत्रकानां समाहारः ।) हस्तिमहिषोष्ट्रगवाजमेषाश्वगर्द्दभमानुषमानुषीणां दशानां मूत्रम् । इति राजनिर्घण्टः ॥ ( एतद्गुणा यथा, सुश्रुते । १ । ४५ ।
"गोमहिषाजाविगजहयखरोष्ट्राणां तीक्ष्णानि कटून्युष्णानि तिक्तानि लवणानुरसानि लघूनि शोधनानि कफवातकृमिमेदोविषगुल्मार्शउदरकुष्ठशोफारोचकपाण्डुरोगहराणि हृद्यानि दीपनानि च सामान्यतः । भवन्ति चात्र ।
"तत् सर्व्वं कटुतीक्ष्णोष्णं लवणानुरसं लघु ।
शोधनं कफवातघ्नं कृमिमेदोविषापहम् ॥
अर्शोजठरगुल्मघ्नं शोफारोचकनाशनम् ।
पाण्डुरोगहरं भेदि हृद्यं दीपनपाचनम् ॥
गोमूत्रं कटु तीक्ष्णोष्णं सक्षारत्वान्न वातलम् ।
लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् ॥
शूलगुल्मोदरानाहविरेकास्थापनादिषु ।
मूत्रप्रयोगसाध्येषु गव्यं मूत्रं प्रयोजयेत् ॥
दुर्नामोदरशूलेषु कुष्ठमेहाविशुद्धिषु ।
आनाहशोफगुल्मेषु पाण्डुरोगे च माहिषम् ॥
कासश्वासापहं शोषकामलापाण्डुरोगनुत् ।
कटुतिक्तान्वितं छागमीषन्मारुतकोपनम् ॥
कासप्लीहोदरश्वासशोषवर्च्चोग्रहे हितम् ।
सक्षारन्तिक्तकटुकमुष्णं वातघ्नमाविकम् ॥
दीपनं कटुतीक्ष्णोष्णं वातचेतोविकारनुत् ।
आश्वं कफहरं मूत्रं कृमिदद्रुषु शस्यते ॥
सतिक्तं लवणं भेदि वातघ्नं पित्तकोपनम् ।
तीक्ष्णं क्षारे किलासे च नागं मूत्रं प्रयोजयेत् ।
गरचेतोविकारघ्नं तीक्ष्णं ग्रहणिरोगनुत् ।
दीपनं गार्द्दभं मूत्रं कृमिवातकफापहम् ॥
शोफकुष्ठोदरोन्मादमारुतक्रिमिनाशनम् ।
अर्शोघ्नं कारभं मूत्रं मानुषञ्च विषापहम् ॥")

दशमूलं, क्ली, ( दशानां मूलानां समाहारः । पात्रादित्वात् न ङीप् । ) पाचनविशेषः । यथा,—
"विल्वश्योणाकगम्भारीपाटलागणिकारिकाः ।
दीपनं कफवातघ्नं पञ्चमूलमिदं महत् ॥
शालपर्णी पृश्निपर्णी वृहतीद्वयगोक्षुरम् ।
वातपित्तहरं वृष्यं कनीयः पञ्चमूलकम् ॥
उभयं दशमूलन्तु सन्निपातज्वरापहम् ।
कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते ॥
पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशनम् ॥"
इति सुखबोधः ॥

दशयोगभङ्गः, पुं, ( दशयोगस्य भङ्गः । ) संस्कारकर्म्मणि नक्षत्रवेधविशेषः । अयं खर्ज्जुरवेधः । यथा,—
"तिथ्यङ्गवेदैकदशोनविंश-
भैकादशाष्टादशविंशसंख्याः ।
इन्दोऽङ्गना सूर्य्ययुतोऽङ्गना च
योगादमुष्येद्दशयोगभङ्गः ॥
अस्यार्थः । कर्म्मकालीनविवाहाद्युक्तनक्षत्राङ्करविभुक्तनक्षत्राङ्कयोर्योगे यदि एते अङ्काः स्युः तदा दशयोगभङ्गः स्यात् ॥ अस्य प्रतिप्रसवो यथा,—
आद्यपादे स्थिते सूर्य्ये तुरीयांशं विवर्ज्जयेत् ।
द्वितीयस्थे तृतीयञ्च विपरीतमतोऽन्यथा ॥"
इति ज्योतिस्तत्त्वम् ॥

दशरथः, पुं, ( दशसु दिक्षु गतो रथो यस्य । ) इक्ष्वाकुवंशीयराजविशेषः । स अयोध्याधिपतिः । अस्योत्पत्तिर्यथा,-
सौराष्ट्रदेशोद्भवभिक्षुनामद्विजपत्नी कलहा भर्त्त्रा सह सर्व्वदा कलहात् मृता प्रेतत्वं गता सा कदाचित् भ्रमन्ती धर्म्मदत्तसंज्ञकं द्विजं दृष्ट्वा तत्समीपमागत्य तद्धस्तस्थतुलसीवारिसंसर्गात् पापभावं परित्यज्य तमुवाच हे द्विज ! मयि कृपां कुरु अहं कथं मुक्तिं प्रयास्यामि । धर्म्मदत्तस्तामुवाच तीर्थदानव्रतादिभिः पापानि नश्यन्ति । तेषु ते नाधिकारः तस्मादाजन्मपर्य्यन्तं यन्मया कार्त्तिकव्रतं कृतं तस्यार्द्धं ददामि इत्युक्त्वा तुलसीमिश्रितजलेन तामसिञ्चयत् द्वादशाक्षरमन्त्रमश्रावयच्च । ततः सा दिव्यरूपा अभवत् । तदा सा दिव्यं विमानमपश्यत् विष्णुगणपुण्यशीलसुशीलाभ्यां सा तद्विमाने आरोहिता । धर्म्मदत्तस्तद्विमानं तौ गणौ च दृष्ट्वा अतिविस्मयेन भूमौ पपात पुण्यशीलसुशीलौ तमुत्थाप्य प्रशस्य ऊचतुः त्वमेतज्जन्मान्ते भार्य्याभ्यां सह वैकुण्ठं यास्यसि । तत्र बहुसहस्रवत्सराणि स्थित्वा पुण्यक्षये सूर्य्यवंशोद्भवदशरथनामा राजा भविष्यसि अनया कलहया सह भार्य्यात्रययुतं त्वां विष्णुः पितृत्वेन स्वीकरिष्यति । इति पाद्मे उत्तरखण्डम् ॥

दशरूपभृत्, पुं, ( दश मत्स्यकूर्म्मवराहादीनि रूपाणि विभर्त्तीति । भृ + क्विप् तुगागमश्च । ) विष्णुः । इति शब्दार्थकल्पतरुः ॥ ( दशावतारशब्देऽस्य विशेषो द्रष्टव्यः ॥ )

दशवाजी, [न्] पुं, ( दश वाजिनो रथे यस्य । ) चन्द्रः । इति हेमचन्द्रः । २ । १८ ॥

दशहरा, स्त्री, ( दश अदत्तोपादानहिंसादिदशविधानि दशजन्मकृतानि वा पापानि हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ९ । इत्यच् ।